रूपार्थपरत्वे तु प्रवृत्तिनिमित्ताभावात् उक्तपुंस्कत्वात् क्लीवत्वेऽपि वा पुंवद्रूपं दधये दधिने कुलाय इत्यादि। अस्य उरःप्रभृतिषु पाठात् बहुव्रीहौ नित्यं कप् बहुदधिको यत्र इत्यादि।

**दधिकूर्च्चिका** स्त्री "दध्ना सह पयः पक्वं यत् स्यात् सा दधिकूर्च्चिका" इत्युक्तलक्षणायामामिक्षायाम्।

**दधिक्रा** पु० दधिः दधदश्वं धारयन् सन् क्रामति क्रम-विट् अन्तस्यात्। १अश्वरूपे अग्न्यात्मके देवभेदे "दधिक्राश्च इळाद्युविश्वरूपम्" ऋ० ४।३८।२। उक्ता व्युत्पत्तिर्भाष्ये दर्शिता। "आ दधिक्राः शवसा पञ्च कृष्टीः" १०।३।२अश्वे निघ०। तन्नामनिरुक्तिः २।२७। तत्र दर्शिता यथा "तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा। तस्याश्ववद् देवतावच्च निगमा भवन्ति"। अतो देवार्थतापीति गम्यते"स चाग्निरूपः दधिक्रावन् शब्दे माधववाक्ये दृश्यम्।

**दधिक्रावन्** पु० दधिः दधत् क्रामति क्रम-वनिप् अन्तस्यात्। अश्वरूपे अग्न्यात्मके देवभेदे। "दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत् प्राण आयूंषि तारिषत्" ताण्ड्य०ब्रा०१।६।१७। "दधिः दधद्धारयन् क्रामतीति दधिक्रावा क्रमेर्वनिपि विड्वनोरनुनासिकस्यादिति" मकारस्याकारः, तस्य दधिक्राव्णः एतत् संज्ञकस्याश्वरूपस्य देवस्य" भा० अत्र द्राह्यायणः, "आग्नीध्रीयं गत्वा दधिभक्षं भक्षयेयुरसमुपह्वय दधिक्राव्ण इति। अत्र यद्यपृथक्त्वात् मन्त्रे दधिक्राव्ण इति अश्वरूपोऽग्निविशेष एव देवतात्वेनाभिधीयते, तथापि दधिशब्दयोगात् सामान्येन दधिभक्षणे विनियोग इति द्रष्टव्यम्" भा०। एतदनुसारेण पञ्चगव्यादिशोधनेऽपि दधिशोधनेऽयं मन्त्रो विनियुक्तः इति बोध्यम्।

**दधिघर्म्म** पु० दधिसंस्कारके वैदिके कर्म्मभेदे। "दधिघर्म्मेण चरन्ति प्रवर्ग्यवांश्चेत्" आश्व० श्रौ० ५।१३।१। दधिघर्मो नाम कर्मविशेषः" नारा०। स च कात्या० श्रौ० उक्तो यथा १०।६।२०। "सप्रवर्ग्ये दधिघर्म्मः"सू० दध्याहरेति प्रेषितो दधिघर्मार्थं दध्याहरति तच्च यागार्थत्वात् सान्नाय्यधर्म्मेण वत्सापाकरणादिना संस्कार्य्यं तत्र दध्नो ह्यहस्साध्यत्वात् पूर्वस्मिन्नहनि प्रातःसवनिकदध्यर्थदोहानन्तरं दधिघर्मः दध्यर्थमपि रात्रौ दोह आतञ्चनान्तः कर्त्तव्यः। तत्सम्बन्धिनो वत्सापाकरणादयोऽग्न्यनैव क्रमेण कर्त्तव्याः प्रवर्ग्यवत्येवायं दधिघर्मः" कर्कः। तत्करणप्रकारमपि तदुत्तरसूत्रैराह यथा "उपविश्य सदसः पुरस्तात् सपवित्रायामग्निहोत्रहवण्यां ग्रहणं यथोक्तम्" २१ सू०। तत् प्रतिप्रस्थाताहृतदधि उत्तरवेदेः पश्चादासाद्यालभ्य ततः सदसः पश्चादुपविश्य सपवित्रायामग्निहोत्रहवण्यां शाखापवित्रेणाग्निहोत्रहवण्याम् यथोक्तं यथा प्रवर्ग्याध्यायोक्तं तथा ग्रहणं करोति अतो यावतीति मन्त्रान्तं स्थालीमुखेनैवाग्निहोत्रहवण्यां निनयनं कर्त्तव्यम्। आनयनञ्च निनयनमेव" कर्कः विस्तरः तदुत्तरसूत्रेषु दर्शितः। तादृशकर्म्मसमुदायस्य दधिघर्मशब्दार्थः।

**दधिचार** पु० दधि चारयति चालयति चर-णिच्-अण् उप० स०। मन्थानदण्डे हारा०। [२दधिजातमात्रे त्रि०।

**दधिज** न० दध्नो जायते जन-ड। १नवनीते राजनि०

**दधित्थ** पु० दधीव तद्वर्णवत् द्रवे तिष्ठति स्था-क पृषो०। कपित्थे अमरः तद्द्रवस्य दधिवर्णत्वात् तथात्वम्। "दधित्थरससंयुक्तां पिप्पलीं माक्षिकान्विताम्" सुश्रु०।

**दधित्थाख्य** पु० दधित्थमाख्याति आ+ख्या-क। सरलद्रवे (लोवान) रत्नमाला।

**दधिधेनु** स्त्री दानार्थं कल्पितदधिकुम्भनिर्मिते धेनुभेदे तद्विधानं हेमा० दा० स्कन्दपु० उक्तो यथा

"दधिधेनोर्महाराज! विधानं शृणु साम्प्रतम्। अनुलिप्ते महीभागे गोमयेन नराधिप!। गोचर्म्ममात्रन्तु पुनः पुष्पप्रकरसंयुतम्। कुशैरास्तीर्य्य वसुधां कृष्णाजिनकृतास्तराम्। दधिकुम्भञ्च संस्थाप्य सप्तधान्यस्य चोपरि। चतुर्थांशेन वत्सन्तु सौवर्णमुखसंयुतम्। प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम्। चन्दनागुरुश्रृङ्गीं च सुखं वै गन्धमाल्यकम्। जिह्वा शर्करया राजन्! घ्राणं श्रीखण्डकं तथा। फलमूलमया दन्ताः सितसूत्रस्य कम्बलाः। ताम्रपृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा। स्वर्णश्रृङ्गीं रौप्यखुरीं नवनीतमयस्तनीम्। इक्षुपादां सुसंकल्प्य सर्वाभरणभूषिताम्। आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम्। ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते। समाधियमयुक्ताय तादृशाय प्रदापयेत्। पुच्छदेशोपविष्टाय मुद्रिकाकर्णमात्रकैः। पादुकोपानहौ छत्रं दत्त्वा मन्त्रमनुस्मरेत्। दधिक्राव्णेतिमन्त्रेण दधिधेनुं प्रदापयेत्। एवं दधिमयीं धेनुं दत्त्वा राजसत्तम!। एकाहारो दिनं तिष्ठेद्दध्ना च रघुनन्दन!। यजमानो वसेद्राजन्! त्रिदिवं च